# Shri Ramapadukastotram

# શ્રીરામપાદુકાસ્તોત્રમ્

## Document Information

Text title : rAmapAdukAstotram

File name : rAmapAdukAstotram.itx

Category : raama, vedAnta-deshika

Location : doc_raama

Author : vedAntadeshika

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીરામપાદુકાસ્તોત્રમ્

(શ્રીવેદાન્તદેશિકકૃતમ્)

સન્તઃ શ્રીરઙ્ગ-પૃથ્વીશ-ચરણત્રાણ-શેખરાઃ ।
જયન્તિ ભુવન-ત્રાણપદપઙ્કજ-રેણવઃ ॥ ૧॥

વન્દે વિષ્ણુપદાસક્તં તમૃષિં તાં ચ પાદુકામ્ ।
યથાર્થા શઠજિત્સંજ્ઞા મચ્ચિત્તવિજયાદ્યયોઃ ॥ ૨॥

વન્દે તદ્રઙ્ગનાથસ્ય માન્યં પાદુકયોર્યુગમ્ ।
ઉન્નતાનામવનતિઃ નતાનાં યત્ર ચોન્નતિઃ ॥ ૩॥

ભજામઃ પાદુકે યાભ્યાં ભરતસ્યાગ્રજસ્તદા ।
પ્રાયઃ પ્રતિ-પ્રયાણાય પ્રાસ્થાનિકમકલ્પયત્ ॥ ૪॥

પ્રશસ્તે રામપાદાભ્યાં પાદુકે પર્યુપાસ્મહે ।
આનૃશંસ્યં યયોરાસીદાશ્રિતેષ્વનવગ્રહમ્ ॥ ૫॥

અધીષ્ટે પાદુકા સા મે યસ્યાઃ સાકેતવાસિભિઃ ।
અન્વયવ્યતિરેકાભ્યામન્વમીયત વૈભવમ્ ॥ ૬॥

પાહિ નઃ પાદુકે યસ્યાઃ વિધાસ્યન્નભિષેચનમ્ ।
આભિષેચનિકં ભાણ્ડં ચક્રે રામઃ પ્રદક્ષિણમ્ ॥ ૭॥

અભિષેકોત્સવાત્તસ્માદ્યસ્યા નિર્યાતનોત્સવઃ ।
અત્યરિચ્યત તાં વન્દે ભવ્યાં ભરતદેવતામ્ ॥ ૮॥

નમસ્તે પાદુકે  પુંસાં સંસારાર્ણવસેતવે ।
પદારોહસ્ય વેદાન્તાઃ વન્દિવૈતાલિકાઃ સ્વયમ્ ॥ ૯॥

શૌરેઃ શૃઙ્ગારચેષ્ટાનાં પ્રસૂતિં પાદુકાં ભજે ।
યામેષ ભુઙ્ક્તે શુદ્ધાન્તાત્પૂર્વં પશ્ચાદપિ પ્રભુઃ ॥ ૧૦॥

અગ્રતસ્તે ગમિષ્યામિ મૃદ્નન્તી કુશ-કણ્ટકાન્ ।

ઇતિ સીતાઽપિ યદ્વૃત્તિં ઇયેષ પ્રણમામિ તામ્ ॥ ૧૧॥

શૌરેઃ સઞ્ચારકાલેષુ પુષ્પવૃષ્ટિર્દિવશ્ચ્યુતા ।
પર્યવસ્યતિ યત્રૈવ પ્રપદ્યે તાં પદાવનીમ્ ॥ ૧૨॥

પાન્તુ વઃ પદ્મનાભસ્ય પાદુકાકેલિપાંસવઃ ।
અહલ્યાદેહનિર્માણપર્યાયપરમાણવઃ ॥ ૧૩॥

શ્રુતીનાં ભૂષણાનાં તે શઙ્કે રઙ્ગેન્દ્રપાદુકે ।
મિથઃ સઙ્ઘર્ષસઞ્જાતં રજઃ કિમપિ શિઞ્જિતમ્ ॥ ૧૪॥

ઉદર્ચિષસ્તે રઙ્ગેન્દ્રપદાવનિ  બહિર્મણીન્ ।
અન્તર્મણિરવં શ્રુત્વા મન્યે રોમાઞ્ચિતાકૃતીન્ ॥ ૧૫॥

મુખબાહૂરૂપાદેભ્યો વર્ણાન્ સૃષ્ટવતઃ પ્રભોઃ ।
પ્રપદ્યે પાદુકાં રત્નૈર્વ્યક્તવર્ણવ્યવસ્થિતિમ્ ॥ ૧૬॥

પ્રપદ્યે રઙ્ગનાથસ્ય પાદુકાં પદ્મરાગિણીમ્ ।
પદૈકનિયતાં તસ્ય પદ્મવાસામિવાપરામ્ ॥ ૧૭॥

બદ્ધાનાં યત્ર નિત્યાનાં મુક્તાનામીશ્વરસ્ય ચ ।
પ્રત્યક્ષં શેષશેષિત્વં સા મે સિદ્ધ્યતુ પાદુકા ॥ ૧૮॥

વન્દે ગારુત્મતીં વૃત્ત્યા મણિસ્તોમૈશ્ચ પાદુકામ્ ।
યયા નિત્યં તુલસ્યેવ હરિતત્વં પ્રકાશ્યતે ॥ ૧૯॥

હરિણા હરિનીલૈશ્ચ પ્રતિયત્નવતીં સદા ।
અયત્નલભ્યનિર્વાણામાશ્રયે મણિપાદુકામ્ ॥ ૨૦॥

શૌરેઃ શુદ્ધાન્તનારીણાં વિહારમણિદર્પણમ્ ।
પ્રસક્તેરિવ સંસ્થાનં પદત્રાણમુપાસ્મહે ॥ ૨૧॥

કલ્યાણપ્રકૃતિં વન્દે ભજન્તીં કાઞ્ચનશ્રિયમ્ ।
પદાર્હાં પાદુકાં શૌરેઃ પદ એવ નિવેશિતામ્ ॥ ૨૨॥

સૃષ્ટં ભૂમાવનન્તેન નિત્યં શેષસમાધિના ।
અહં સમ્ભાવયામિ ત્વામાત્માનમિવ પાદુકે ॥ ૨૩॥

પ્રપદ્યે પાદુકારૂપં પ્રણવસ્ય કલાદ્વયમ્ ।
ઓન્તં મિતમિદં યસ્મિન્ અનન્તસ્યાપિ તત્પદમ્ ॥ ૨૪॥

અણોરણીયસીં વિષ્ણોર્મહતોઽપિ મહીયસીમ્ ।
પ્રપદ્યે પાદુકાં નિત્યં તત્પદેનૈવ સમ્મતામ્ ॥ ૨૫॥

ઉદગ્રયન્ત્રકાં વન્દે પાદુકાં યન્નિવેશનાત્ ।
ઉપર્યપિ પદં વિષ્ણોઃ પ્રત્યાદિષ્ટપ્રસાધનમ્ ॥ ૨૬॥

સૂચયન્તીં સ્વરેખાભિરનાલેખ્યસરસ્વતીમ્ ।
આલેખનીયસૌન્દર્યામાશ્રયે શૌરિપાદુકામ્ ॥ ૨૭॥

કલાસુ કાષ્ઠામાતિષ્ઠન્ ભૂમ્ને સમ્બન્ધિનામપિ ।
પાદુકા રઙ્ગધુર્યસ્ય ભરતારાધ્યતાં ગતા ॥ ૨૮॥

વિધૌ પ્રવૃત્તે યદ્દ્રવ્યં ગુણસંસ્કારનામભિઃ ।
શ્રેયસ્સાધનમામ્નાતં તત્પદત્રં તથાસ્તુ મે ॥ ૨૯॥

પ્રતિષ્ઠાં સર્વચિત્રાણાં પ્રપદ્યે મણિપાદુકામ્ ।
વિચિત્રજગદાધારો વિષ્ણુર્યત્ર પ્રતિષ્ઠિતઃ ॥ ૩૦॥

પ્રપદ્યે પાદુકાં દેવીં પરવિદ્યામિવ સ્વયમ્ ।
યામર્પયતિ દીનાનાં દયમાનો જગદ્ગુરુઃ ॥ ૩૧॥

ઉપાખ્યાતં તથાત્વેન વસિષ્ઠાદ્યૈર્મહર્ષિભિઃ ।
ઉપાયફલયોઃ કાષ્ઠામુપાસે રામપાદુકામ્ ॥ ૩૨॥

જયતિ યતિરાજસૂક્તિર્જયતિ મુકુન્દસ્ય પાદુકાયુગળી ।
તદુભયધનાસ્ત્રિવેદીમવન્ધ્યયન્તો જયન્તિ ભુવિ સન્તઃ ॥ ૩૩॥

ઇતિ શ્રીવેદાન્તદેશિકકૃતં શ્રીરામપાદુકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Ramapadukastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*